# Shaktivinayaka Stuti Savarnikrita

# સાવર્ણિકૃતા શક્તિવિનાયકસ્તુતિઃ

## Document Information

Text title : Shaktivinayaka Stuti Savarnikrita

File name : shaktivinAyakastutiHsAvarNikRRitA.itx

Category : ganesha, mudgalapurANa, stuti, devii, devI

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 15 | 5.15. 22-41||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


June 5, 2024

*sanskritdocuments.org*

# સાવર્ણિકૃતા શક્તિવિનાયકસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
સાવર્ણિરુવાચ ।
નમસ્તે ગણનાથાયૈ નમસ્તે ગણપાલક ।
ચતુર્બાહુધરાયૈવ ચતુર્બાહુધરાય તે ॥ ૨૨॥
અનાદ્યાયૈ હ્યનાદ્યાય પરેશાયૈ પરાત્મને ।
ભક્તવિઘ્નહરાયૈ તે ભક્તવિઘ્નહરાય ચ ॥ ૨૩॥
હેરમ્બાયૈ નમસ્તુભ્યં હેરમ્બાય નમો નમઃ ।
લમ્બોદરસ્વરૂપાયૈ નમો લમ્બોદરાય તે ॥ ૨૪॥
નાનારૂપધરાયૈવ નાનારૂપધરાય ચ ।
નમો નમો મહાદેવ્યૈ દેવાધિપતયે નમઃ ॥ ૨૫॥
ગજવક્ત્રધરાયૈ તે ગજવક્ત્રધરાય ચ ।
શૂર્પકર્ણસ્વરૂપાયૈ શૂર્પકર્ણાય તે નમઃ ॥ ૨૬॥
એકદન્તધરાયૈ ચૈકદન્તરૂપિણે નમઃ ।
માયામોહહરાયૈવ મોહહર્ત્રે નમો નમઃ ॥ ૨૭॥
સ્વાનન્દપુરસંસ્થાયૈ નમઃ સ્વાનન્દવાસિને ।
પરશ્વાદિધરાયૈ ચ પરશ્વાદિધરાય તે ॥ ૨૮॥
નમઃ સર્વપ્રબોધાયૈ નમઃ સર્વપ્રબોધક ।
માયિભ્યો મોહદાત્ર્યૈ તે માયિભ્યો મોહદાય ચ ॥ ૨૯॥
ઢુણ્ઢિરાજ્ઞ્યૈ નમસ્તુભ્યં ઢુણ્ઢિરાજાય તે નમઃ ।
વક્રતુણ્ડધરાયૈ તે વક્રતુણ્ડાય તે નમઃ ॥ ૩૦॥
સર્વાદિપૂજ્યકાયૈ ચ સર્વાદિપૂજ્યકાય તે ।
નમસ્તે સર્વપૂજ્યાયૈ સર્વપૂજ્યાય તે નમઃ ॥ ૩૧॥
અનન્તખેલકારિણ્યૈ હ્યનન્તખેલકારિણે ।
નમો નમો મહાશક્તે નમઃ શક્તિધરાય તે ॥ ૩૨॥
નાનાભેદકરાયૈ તે નાનાભેદમયાય ચ ।

નમો નમઃ પરેશાયૈ પરેશાય નમો નમઃ ॥ ૩૩॥
યા શક્તિઃ સૈવ વિઘ્નેશો નાન્તરં વિદ્યતે ક્વચિત્ ।
અજ્ઞાનેન મહાભાગૌ સ્ત્રીપુમ્ભાવઃ પ્રદૃશ્યતે ॥ ૩૪॥
યત્ર વેદાદયો યોગિનો દેવેશા વિસિસ્મિરે ।
તત્ર સ્તોતું ચ કોઽહં તાવલ્પજ્ઞાનપ્રધારકઃ ॥ ૩૫॥
ભવતોર્દર્શનેનૈવ બોધયુક્તોઽહમઞ્જસા ।
તેન સ્તુતૌ ગણાધ્યક્ષૌ યોગશાન્તિપ્રદાયકૌ ॥ ૩૬॥
પ્રયચ્છતં મહાયોગમધુના મે નમામ્યહમ્ ।
ભક્તિં ચ ભવતોર્મે તુ સુદૃઢાં દાતુમર્હથઃ ॥ ૩૭॥
ઇત્યુક્ત્વા દણ્ડવદ્ભૂમૌ પપાત પદયોસ્તયોઃ ।
મનુસ્તૌ હર્ષસંયુક્તાવૂચતુસ્તં મહીપતિમ્ ॥ ૩૮॥
(ફલશ્રુતિઃ)
શક્તિવિનાયકાવૂચતુઃ ।
શાન્તિયોગં મહાભાગ લભસે યોગસેવયા ।
ભક્તિં દૃઢાં ચ નૌ પાદે સદાઽઽદિત્યકુમારક ॥ ૩૯॥
ભુક્ત્વા મન્વન્તરં પૂર્ણં યશઃ સ્થાપ્ય જગત્ત્રયે ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો ભવિષ્યસિ ॥ ૪૦॥
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
પઠતે શૃણ્વતે ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૪૧॥

ઇતિ સાવર્ણિકૃતા શક્તિવિનાયકસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૧૫ । ૫.૧૫। ૨૨-૪૧॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 15 . 5.15. 22-41..

Proofread by Yash Khasbage, Preeti Bhandare

*Shaktivinayaka Stuti Savarnikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*